*AH-III/Sanskrit-301C-5/19*

# B.A. Semester III (Honours) Examination, 2018-19

## SANSKRIT

**Course ID : 30911** **Course Code : AHSNS-301C-5**

Course Title : Vedic Literature

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु प्रश्नेषु ***पञ्च***प्रश्नाः सुरगिरा देवनागरीलिप्या लघुतया च समाधेयाः। 2×5=10

(a) सायणमतानुसारम् ऋक्संहितायाः समेषां विभागानां नामानि लेख्यानि।

(b) इन्द्रसूक्तस्य सजनीयसूक्तमिति नाम कथम्?

(c) अक्षसूक्तस्य कः ऋषिः? किं च छन्दः?

(d) ब्रह्मयज्ञजपादौ इत्यत्र आदिपदेन किं किं गृह्यते?

(e) वैदिकसाहित्ये कस्य देवस्य कृते अधिकानि सूक्तानि प्राप्यन्ते? याज्या पुरोऽनुवाक्या चेति शब्दद्वयस्य कोऽर्थः?

(f) पदपाठे 'इति'—प्रयोगस्य नियमद्वयं सोदाहरणं लेख्यम्।

(g) हिरण्यगर्भसूक्ते 'कस्मै' इति पदस्य कोऽर्थः?

(h) 'अ॒ग्निमी॑ळे'— इत्यत्र पदपाठे कीदृशः स्वरो दृश्यते?

**2.** कस्यचि***देकस्य*** भाष्यवचनस्य तात्पर्यं सप्रसङ्गं लेख्यम्। 5×1=5

(a) अग्निमीळे इति सूक्तं प्रातरनुवाक आग्नेयक्रतौ विनियुक्तम्।

(b) गतो विनियोगः।

**3.** अधस्तात् कस्यचि***देकस्य*** मन्त्रस्य ऋषिच्छन्दोदेवताविनियोगनिर्देशपूर्वकं व्याख्यानं कर्तव्यम्। 5×1=5

(a) स नः॑ पि॒तेव॑ सू॒नवे॒
ऽग्ने॑ सूपाय॒नो भ॑व।
सच॑स्वा नः स्व॒स्तये॑।।

(b) य आ॑त्मदा ब॑ल॒दा यस्य॒ विश्व॑
उ॒पास॑ते प्र॒शिषं॒ यस्य॑ दे॒वाः।
यस्य॑ छा॒यामृ॒तं यस्य॑ मृत्युः
कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम।।

**4.** उपर्युक्तयोः [3. (a), (b) इत्यनयोः] मन्त्रयोः कस्यचि***देकस्य*** मन्त्रस्य पदपाठो विधेयः। 5×1=5

**5.** अधोनिर्दिष्टेषु ***एकम्*** आश्रित्य टीका लेख्या। 5×1=5

लेट्लकारः, वैदिकतुमर्थप्रत्ययः, लिङ्लकारः

**6.** अधस्तात् कस्यचि***देकस्य*** प्रश्नस्योत्तरं वैशद्येन देयम्। 10×1=10

(a) स्वपाठ्यानुसारं इन्द्रदेवस्य चारित्रिकवैशिष्ट्यं पर्यालोचनीयम्।

(b) अक्षसूक्ते प्रतिपादितं सामाजिकचित्रं विशदतया उपस्थाप्यताम्।

(c) हिरण्यगर्भसूक्तस्य दार्शनिकतात्पर्यं लेख्यम्।

———